रथ सप्तमि श्लोकाः

रथ सप्तमि श्लोकाः

अर्कपत्र स्नान श्लोकाः |
सप्तसप्तिप्रिये देवि सप्तलोकैकदीपिके |
सप्तजन्मार्जितं पापं हर सप्तमि सत्वरं || 1 ||

यन्मयात्र कृतं पापं पूर्वं सप्तसु जन्मसु |
तत्सर्वं शोकमोहौ च माकरी हंतु सप्तमी || 2 ||

नमामि सप्तमीं देवीं सर्वपापप्रणाशिनीं |
सप्तार्कपत्रस्नानेन मम पापं व्यापोहतु || 3 ||

अर्घ्य श्लोकं |
सप्त सप्ति वहप्रीत सप्तलोक प्रदीपन |
सप्तमी सहितो देव गृहाणार्घ्यं दिवाकर || 1 ||

अन्य पाठः –
यदा जन्मकृतं पापं मया जन्मसु जन्मसु |
तन्मे रोगं च शोकं च माकरी हंतु सप्तमी || 1

एतज्जन्म कृतं पापं यच्च जन्मांतरार्जितं |
मनो वाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः || 2

इति सप्तविधं पापं स्नानान्मे सप्त सप्तिके |
सप्तव्याधि समायुक्तं हर माकरि सप्तमी || 3

सप्त सप्त महासप्त सप्त द्वीपा वसुंधरा |
श्वेतार्क पर्णमादाय सप्तमी रथ सप्तमी || 4